मुखे मलं विगन्धत्वं विरसत्वञ्च नश्यति ।
मनः प्रसन्नं भवति भोजनेऽतिरुचिर्भवेत् ॥
ज्वरितो हितमश्नीयाद्यद्यप्यस्यारुचिर्भवेत् ।
अन्नकाले ह्यभुञ्जानः क्षीयते म्रियतेऽपि च ॥”
अयमर्थः । यद्यपि अस्य ज्वरितस्य हिते भक्ष्ये अरुचिर्भवेत् तथापि ज्वरितो हितमेवाश्नीयादिति नियमः । यत आह सुश्रुतः ।
“गुर्व्वभिष्यन्द्यकालञ्च ज्वरी नाद्यात् कथञ्चन ।
न तु तस्याहितं भक्तमायुषे चासुखाय च ॥
आनद्धस्तिमितैर्द्दोषैर्यावन्तं कालमातुरः ।
तावत्कालं स लघ्वन्नमश्नीयात सविरिक्तवत् ॥”
आनद्धस्तिमितैर्द्दोषैः अपक्वैर्द्दोषैर्यावन्न इत्यर्थः ॥ ननु हिते वस्तुनि कथमरुचिः स्यादत आह । सात्म्यात् स्वाद्वभावाच्च पथ्यं द्वेष्यत्वमागतमिति । सात्म्यात् एकस्यैव भक्ष्यस्य सर्व्वदोपयोगात् । स्वाद्वभावाच्च भक्ष्यान्तरादपि विस्वादुतः । पथ्यमप्रियं स्यात् तथापि तदेव पथ्यम् । कल्पनाविधिभिस्तैस्तैः प्रियत्वं गमयेत् पुनरिति ॥ अथ च ज्वरितोऽन्नकालेऽश्नीयादेवेति द्वितीयो नियमः । कुत इति चेत् हि यतो हेतो अभुञ्जानः क्षीयतेऽपक्वधातुर्भवति ततो म्रियतेऽपि च ॥ * ॥
ज्वरिताय हितान्यन्नादीन्याह ।
“रक्तशाल्यादयः शस्ताः पुराणाः षष्टिकैः सह ।
यवाग्वोदनलाजार्थे ज्वरितानां ज्वरापहाः ॥”
तत्र रक्तशालिगुणाः ।
“रक्तशालिर्ज्वरस्तेषां बल्यो वर्ण्यस्त्रिदोषजित् ।
चक्षुष्यो मूत्रलः स्वर्य्यः शुक्रलस्तृड्ज्वरापहः ॥
विषव्रणश्वासकासदाहनुद्वह्निपुष्टिदः ।
तस्मादल्पान्तरगुणाः शालयो महदादयः ॥”
रक्तशालिर्यो मगधदेशे दाउदखानी इति प्रसिद्धः ॥
“मुद्गान् मसूरांश्चणकान् कुलत्थान् समकुष्ठकान् ।
यूषार्थे यूषसात्म्यानां ज्वरितानां प्रदापयेत् ॥”
तत्र मुद्गादिगुणास्तत्तच्छब्दे द्रष्टव्याः ॥ * ॥
“पटोलपत्रं वार्त्ताकुं कुलकं कारवेल्लकम् ।
कर्कोटकं पर्पटकं गोजिह्वां बालमूलकम् ॥
पत्रं गुडूच्याः शाकार्थे ज्वरितानां प्रदापयेत् ॥”
तत्र पटोलादिगुणास्तत्तच्छब्दे द्रष्टव्याः ॥ * ॥
“लावान् कपिञ्जलानेणान् हरिणान् पृषतान् शशान् ।
कुरङ्गान् कालपुच्छांश्च तथैव मृगमातृकान् ॥
मांसार्थे मांससात्म्यानां ज्वरितानां प्रदापयेत् ।
सारसक्रौञ्चशिखिनस्तथा तित्तिरकुक्कुटान् ॥
गुरूष्णत्वान्न शंसन्ति केचिदेवं व्यवस्थिताः ॥”
तित्तिरिरत्र कृष्णतित्तिरिः । गौरतित्तिरेः कपिञ्जलपदेन पूर्व्वं गृहीतत्वात् ॥
“ज्वरितानां प्रकोपन्तु यदा याति समीरणः ।
तदैतेऽपि हि शस्यन्ते मात्राकालोपपादिताः ॥
कपिञ्जल इति ख्यातो लोकेषु गौरतित्तिरिः ॥”
इति ॥ * ॥
“निम्बूकं दाडिमं धात्रीफलमम्लं प्रकाङ्क्षते ।
प्रदद्यादन्नसात्म्याय काञ्जिकं वा पुरातनम् ॥”

अथौषधसिद्धायाः पेयायाः गुणाश्च ।
“अन्नकाले हिता पेया यथास्वं पाचनैः कृता ।
दीपनी पाचनी लघ्वी ज्वरार्त्तानां ज्वरापहा ॥”
यथास्वं पाचनैः कृता यथादोषं पाचनैः कृता । यथा,—
“पञ्चमूल्याः कषायन्तु पाचनं वातिके ज्वरे ।
सक्षौद्रं पैत्तिके मुस्तकटुकेन्द्रयवैः कृतम् ॥
पिप्पल्यादिकषायन्तु पाचनं कफजे ज्वरे ।
लघुना पञ्चमूलेन पिप्पल्या सह धान्यया ॥
महत्या पञ्चमूल्याथ व्याघ्री दुस्पर्शगोक्षुरैः ।
सिद्धानि भिषगन्नानि प्रयुञ्जीत यथाक्रमम् ॥
वातपित्ते श्लेष्मपित्ते कफवाते त्रिदोषजे ॥”
अस्यायमर्थः । वातपित्ते लघुना पञ्चमूलेन सिद्धान्यन्नानि भिषक् प्रयुञ्जीत ।
“शालिपर्णी पृश्निपर्णी कण्टकारीद्वयं तथा ।
गोक्षुरः पञ्चमः प्रोक्तः पञ्चमूलमिदं लघु ॥
श्लेष्मपित्ते वातपित्ते पिप्पल्या सह धान्यया ॥”
कफवाते महत्या पञ्चमूल्या ।
“श्रीफलः सर्व्वतोभद्रा पाटला गणिकारिका ।
श्योनाकः पञ्चमः प्रोक्तः पञ्चमूलमिदं महत् ॥
त्रिदोषजे ज्वरे देया व्याघ्री दुस्पर्शगोक्षुरैः ।
व्याघ्री कण्टकारिका । दुस्पर्शो यवासः ।
पेयां वा रक्तशालीनां वस्तिपार्श्वशिरोरुजि ।
श्वदंष्ट्राकण्टकारीभ्यां सिद्धां ज्वरहरीं पिबेत् ॥
विबद्धवर्च्चाः सयवां पिप्पल्यामलकैः शृताम् ।
सर्पिष्मतीं पिबेत् पेयां ज्वरी दोषानुलोमनीम् ॥
कासी श्वासी च हिक्की च पञ्चमूलीशृतां पिबेत् ॥”
यवोऽत्रान्नम् । अत्र पञ्चमूली वृहती लघ्वी च हिता । तया शृतां पेयां पिबेदित्यर्थः ।
“पेया भेषजसंयोगाल्लघुत्वाच्चाग्निदीपिका ।
वातमूत्रपुरीषाणां दोषाणां चानुलोमिका ॥
स्वेदनाय च सोष्णत्वाद्द्रवत्वात् तृट्प्रशमाय च ।
आहारभावात् प्राणाय सरत्वाल्लाघवाय च ॥
ज्वरघ्नी हेतुसात्म्यत्वात्तस्मात्तां पूर्व्वमाचरेत् ॥”
हेतुसात्म्यत्वात् हेतवो वातपित्तकफास्तेषां सात्म्यत्वात् ॥
“यवकोलकुलत्थानां मुद्गमूलकशुण्ठयोः ।
एकैकं मुष्टिमादाय पचेदष्टगुणे जले ॥
पञ्चमुष्टिक इत्येष वातपित्तकफापहः ।
शूले प्रशस्यते गुल्मे कासे श्वासे क्षये ज्वरे ॥”
पञ्चमुष्टिकयूषः ॥ * ॥
“रुद्धमूत्रपुरीषस्य गुदे वर्त्तिं निधापयेत् ।
पिप्पलीपिप्पलीमूलं यवानीपयसाधितम् ॥
पाययेत यवागूं वा मारुतादनुलोमनीम् ॥”
पेयाया यवाग्वाश्च क्वचिदपवादमाह ।
“मदात्यये मद्यनित्ये ग्रीष्मे पित्तकफोत्थिते ।
ऊर्द्ध्वगे रक्तपित्ते च यवागूर्न्न हिता ज्वरे ॥
दाहच्छर्द्दार्दितं क्षामं निरन्नं तृष्णयान्वितम् ।
शर्क्करामधुसंयुक्तं पाययेल्लाजतर्पणम् ॥”
लाजशक्तुरूपं तर्पणम् । तथा च ग्रन्थान्तरे ।
“दाहच्छर्द्दार्दितं क्षामं निरन्नं तृष्णयान्वितम् ।
घर्म्मार्त्तं मद्यपञ्चापि तोयालोड़ितशक्तुकम् ॥
शर्क्करामधुसंयुक्तं पाययेल्लाजतर्पणम् ।
ज्वरापहैः फलरसैर्युक्तमन्नं हितं क्वचित् ॥” * ॥
सन्तर्पणस्वरूपञ्चाह धन्वन्तरिः ।
“द्राक्षादाड़िमखर्ज्जूरमृदितांम्बुसशर्क्करम् ।
लाजचूर्णं समध्वाज्यं सन्तर्पणमुदाहृतम् ॥
लाजाचूर्णम् । द्राक्षादिजलशर्क्करामध्वाज्यसहितं तर्पणमुक्तमित्यर्थः ॥ लाजशक्तुगुणाश्च गुणग्रन्थे ।
“लाजानां शक्तवः क्षौद्रसितायुक्ता विशेषतः ।
छर्द्यतीसारतृड्दाहविषमूर्च्छाज्वरापहाः ॥”
चरकश्च ।
“तत्र तर्पणमेवादौ प्रदेयं लाजशक्तुतः ।
ज्वरापहैः फलरसैर्युक्तं मधुसशर्क्करम् ॥”
ज्वरघ्नानि फलान्याह चरक एव ।
“द्राक्षादाड़िमखर्ज्जूरपियालैः सपरूषकैः ।
तर्पणार्हस्य दातव्यं तर्पणं ज्वरनाशनम् ॥”
पियालमत्र पक्वफलं न तन्मज्जातिगुरुत्वात् । तर्पणार्हस्य दाहच्छर्द्दितृषार्त्तस्य लङ्घितस्य क्षीणस्येत्यर्थः ।
श्रमोपवासानिलजे हितो नित्यं रसौदनः ॥
रसोऽत्र मांसरसः । तेन सिक्त ओदनो रसौदनः । अन्नेन व्यञ्जनमित्यनेन समासः ॥
“मुद्गयूषौदनश्चैव हितः कफसमुत्थिते ।
स एव सितया युक्तः शीतपित्तज्वरे हितः ॥”
स एव मुद्गयूषौदन एव ॥
“कृशोऽल्पदोषो यः क्षीणकफो जीर्णज्वरान्वितः ।
विबन्धाल्पष्टदोषश्च रूक्षः पित्तानिलज्वरी ॥
पिपासार्त्तः सदाहश्च पयसा स सुखी भवेत् ॥”
अन्यच्च ।
“अजादुग्धं गुड़ोपेतं पातव्यं ज्वरशान्तये ।
तदेव तु पयः पीतं तरुणे हन्ति मानवम् ॥”
तरुणे ज्वरे ; अन्यच्च ।
“जीर्णे ज्वरे कफे क्षीणे क्षीरं स्यादमृतोपमम् ।
तदेव तरुणे पीतं विषवद्धन्ति मानवम् ॥” * ॥
अथ ज्वरिणो नियममाह ।
“न हिरद्यान्न पूर्व्वाह्ने नाभिष्यन्दि कदाचन ।
न तीक्ष्णं न गुरुप्रायो भुञ्जीत तरुणज्वरी ॥
न जातु तर्पयेत् प्राज्ञः सहसा ज्वरकर्षितम् ।
तेन संशमितोऽप्यस्य पुनरेव भवेज्ज्वरः ॥” * ॥
अथ ज्वरविमुक्तेः पूर्व्वरूपमाह ।
“दाहः स्वेदो भ्रमस्तृष्णा कम्पविड्भिदसंज्ञिताः ।
कूजनं चाविवैगन्ध्यमाकृतिर्ज्वरमोक्षणे ॥”
विड्भित् मलप्रवृत्तिः । अत्र सम्पदादित्वात् भावे क्विप् । कूजनं कुन्थनम् । अविवैगन्ध्यं गात्रस्य । ज्वरमुक्तौ भविष्यत्यामेतल्लक्षणं भवति ॥ ननु दोषक्षयं विना न व्याधिनिवृत्तिः । क्षीणश्च दोषः कथमेवंविधं रूपं करिष्यति । उच्यते । कश्चित् क्षीणोऽपि दोषः विनाशकाले स्वशक्तिं दर्शयति । यथा निर्व्वाणावस्थायां दीपो विशेषात् प्रज्वलति । वाग्भटोऽप्याह ।
“धातून् प्रक्षोभयन्दोषो मोक्षकाले विलीयते ।
ततो नरः श्वसन् कूजन् वमन् खिद्यन्न चेष्टते ॥”
न चेष्टते अचेष्टश्च स्यात् ।